जरः, [1]जजीर्वान्-जेरिवान्, जारः, जिजरीषुः-जिजरिषुः-जिजीर्षुः, जेजिरः;

जरीतव्यम्-जरितव्यम्, जारयितव्यम्, जिजरीषितव्यम्-जिजरिषितव्यम्-जिजीर्षितव्यम्, जेजिरितव्यम्;

जरणीयम्, जारणीयम्, जिजरीषणीयम्-जिजरिषणीयम्-जिजीर्षणीयम्-जेजिरणीयम्;

जार्यम्, जार्यम्, जिजरीष्यम्-जिजरिष्यम्-जिजीर्ष्यम्, जेजीर्यम्;

ईषज्जरः-दुर्जरः-सुजरः; — — —

[2]जीर्यमाणः, जार्यमाणः, जिजरीष्यमाणः-जिजरिष्यमाणः-जिजीर्ष्यमाणः; जेजीर्यमाणः,

जारः, जारः, जिजरीषः-जिजरिषः-जिजीर्षः, जेजिरः;

जरीतुम्-जरितुम्, जारयितुम्, जिजरीषितुम्-जिजरिषितुम्-जिजीर्षितुम्, जेजिरितुम्;

[3]जीर्णिः, जारणा, जिजरीषा-जिजरिषा-जिजीर्षा, जेजिरा;

जरणम्, जारणम्, जिजरीषणम्-जिजरिषणम्-जिजीर्षणम्, जेजिरणम्;

[4]जरीत्वा-[A]जरित्वा, जारयित्वा, जिजरीषित्वा-जिजरिषित्वा-जिजीर्षित्वा, जेजिरित्वा;

प्रजीर्य, प्रजार्य, प्रजिजरीष्य-प्रजिजरिष्य-प्रजिजीर्ष्य, प्रजेजीर्य;

| | | | | |
|---|---|---|---|---|
| जारम् २<br>जरीत्वा २<br>जरित्वा २ | जारम् २<br>जारयित्वा २ | जिजरीषम् २<br>जिजरिषम् २<br>जिजीर्षम् २ | जिजरीषित्वा २<br>जिजरिषित्वा २<br>जिजीर्षित्वा २ | जेजिरम् २;<br>जेजिरित्वा २. |

---

1. 'छान्दसः क्वसुः क्वचिद् भाषायां भवति।' इति न्यायेन लिटः क्वस्वादेशे द्वित्वे, 'वा जॄभ्रमुत्रसाम्' (6-4-124) इत्येत्वाभ्यासलोपविकल्पे रूपद्वयं भवति।

2. भावे यकि इत्वरपरत्वयोः, 'हलि च' (8-2-77) इति दीर्घे णत्वे च रूपम्।

3. 'ॠल्वादिभ्यः क्तिन् निष्ठावद्वाच्यः' (वा. 8-2-42) इति क्तिनस्तकारस्य नत्वे णत्वे च रूपम्।

4. 'श्र्युकः क्किति' (7-2-11) इति इण्णिषेधे प्राप्ते, 'जॄव्रश्च्योः क्त्वि' (7-2-55) इति नित्यमिट्। दीर्घविकल्पः।

A. 'जरित्वेव जवेनान्ये निपेतुस्तस्य शाखिनः।' भ. का. 9.41.